**Draft Release Version**

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

ह॒रिः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

# पञ्चम काण्डे , प्रथमः प्रश्नः

## Table of Contents

5. कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः............................3

5.1 पञ्चम काण्डे प्रथमः प्रश्नः – उख्याग्निकथनं...................3

==============================

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

## 5. कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

### 5.1 पञ्चम काण्डे प्रथमः प्रश्नः – उख्याग्निकथनं

**T.S. 5.1.1.1 - Kramam**

सावित्राणि जुहोति । जुहोति प्रसूत्यै । प्रसूत्यै चतुर्गृहीतेन ।
प्रसूत्या इति प्र – सूत्यै । चतुर्गृहीतेन जुहोति । चतुगृहीतेनेति
चतुः – गृहीतेन । जुहोति चतुष्पादः । चतुष्पादः पशवः । चतुष्पाद
इति चतुः – पादः । पशवः पशून् । पशूनेव । एवाव । अव रुन्धे ।
रुन्धे चतस्रः । चतस्रो दिशः । दिशो दिक्षु । दिक्ष्वेव । एव प्रति ।
प्रति तिष्ठति । तिष्ठति छन्दाꣳसि । छन्दाꣳसि देवेभ्यः । देवेभ्योऽप ।
अपाक्रामन्न् । अक्रामन् न । न वः । वोऽभागानि । अभागानि
हव्यम् । हव्यम् वँक्ष्यामः । वक्ष्याम इति । इति तेभ्यः । तेभ्य एतत् ।
एतच् चतुर्गृहीतम् । चतुर्गृहीतमधारयन्न् । चतुर्गृहीतमिति
चतुः – गृहीतम् । अधारयन् पुरोनुवाक्यायै । पुरोनुवाक्यायै
याज्यायै । पुरोनुवाक्याया इति पुरः – अनुवाक्यायै ।

याज्यायै देवतायै । देवतायै वषट्काराय । वषट्काराय यत् ।
वषट्कारायेति वषट् - काराय । यच् चतुर्गृहीतम् । चतुर्गृहीतम्
जुहोति । चतुर्गृहीतमिति चतुः - गृहीतम् । जुहोति छन्दाꣳसि ।
छन्दाꣳस्येव । एव तत् । तत् प्रीणाति । प्रीणाति तानि । तान्यस्य ।
अस्य प्रीतानि । प्रीतानि देवेभ्यः । देवेभ्यो हव्यम् । हव्यम् ँवहन्ति ।
वहन्ति यम् । यम् कामयेत । कामयेत पापीयान् । **1** (**50/57**)

**T.S. 5.1.1.2 - Kramam**

पापीयान्थ् स्यात् । स्यादिति । इत्येकैकम् । एकैकम् तस्य ।
एकैकमित्येकम् - एकम् । तस्य जुहुयात् । जुहुयादाहुतीभिः ।
आहुतीभिरेव । आहुतीभिरित्याहुति - भिः । एवैनम् । एनमप ।
अप गृह्णाति । गृह्णाति पापीयान् । पापीयान् भवति । भवति यम् ।
यम् कामयेत । कामयेत वसीयान् । वसीयान्थ् स्यात् । स्यादिति ।
इति सर्वाणि । सर्वाणि तस्य । तस्यानुद्रुत्य । अनुद्रुत्य जुहुयात् ।
अनुद्रुत्येत्यनु - द्रुत्य । जुहुयादाहुत्या । आहुत्यैव ।
आहुत्येत्या - हुत्या । एवैनम् । एनमभि । अभि क्रमयति ।
क्रमयति वसीयान् । वसीयान् भवति । भवत्यथो । अथो यज्ञस्य ।

अथो इत्यथो । यज्ञस्यैव । एवैषा । एषाऽभिक्रान्तिः । अभिक्रान्तिरेति ।
अभिक्रान्तिरित्यभि – क्रान्तिः । एति वै । वा एषः । एष यज्ञमुखात् ।
यज्ञमुखादृद्ध्याः । यज्ञमुखादिति यज्ञ – मुखात् । ऋद्ध्या यः ।
योऽग्नेः । अग्नेर् देवतायाः । देवताया एति । एत्यष्टौ । अष्टावेतानि ।
एतानि सावित्राणि । सावित्राणि भवन्ति । भवन्त्यष्टाक्षरा ।
अष्टाक्षरा गायत्री । अष्टाक्षरेत्यष्टा – अक्षरा । गायत्री गायत्रः ।
गायत्रोऽग्निः । **2** (**50/58**)

**T.S. 5.1.1.3 - Kramam**

अग्निस्तेन । तेनैव । एव यज्ञमुखात् । यज्ञमुखादृद्ध्याः ।
यज्ञमुखादिति यज्ञ – मुखात् । ऋद्ध्या अग्नेः । अग्नेर् देवतायै ।
देवतायै न । नैति । एत्यष्टौ । अष्टौ सावित्राणि । सावित्राणि भवन्ति ।
भवन्त्याहुतिः । आहुतिर् नवमी । आहुतिरित्या – हुतिः । नवमी
त्रिवृतम् । त्रिवृतमेव । त्रिवृतमिति त्रि – वृतम् । एव यज्ञमुखे ।
यज्ञमुखे वि । यज्ञमुख इति यज्ञ – मुखे । वि यातयति । यातयति
यदि । यदि कामयेत । कामयेत छन्दाꣳसि । छन्दाꣳसि यज्ञयशसेन ।
यज्ञयशसेनार्पयेयम् । यज्ञयशसेनेति यज्ञ – यशसेन ।

अर्पयेयमिति । इत्यृचम् । ऋचमन्तमाम् । अन्तमाम् कुर्यात् ।
कुर्याच्छन्दा॑ꣳसि । छन्दा॑ꣳस्येव । एव यज्ञयशसेन ।
यज्ञयशसेनार्पयति । यज्ञयशसेनेति यज्ञ - यशसेन । अर्पयति यदि ।
यदि कामयेत । कामयेत यजमानम् । यजमानम् यँज्ञयशसेन ।
यज्ञयशसेनार्पयेयम् । यज्ञयशसेनेति यज्ञ-यशसेन । अर्पयेयमिति ।
इति यजुः । यजुरन्तमम् । अन्तमम् कुर्यात् । कुर्याद् यजमानम् ।
यजमानमेव । एव यज्ञयशसेन । यज्ञयशसेनार्पयति । यज्ञयशसेनेति
यज्ञ - यशसेन । अर्पयत्यृचा । ऋचा स्तोमम् । स्तोमꣳ सम् ।
समर्द्धय । अर्द्धयेति । इत्याह । **3 (50/58)**

**T.S. 5.1.1.4 - Kramam**

आह समृद्ध्यै । समृद्ध्यै चतुर्भिः । समृद्ध्या इति सम्-ऋद्ध्यै ।
चतुर्भिरभ्रिम् । चतुर्भिरिति चतुः - भिः । अभ्रिमा । आ दत्ते । दत्ते
चत्वारि । चत्वारि छन्दाꣳसि । छन्दाꣳसि छन्दोभिः । छन्दोभिरेव ।
छन्दोभिरिति छन्दः-भिः । एव देवस्य । देवस्य त्वा । त्वा सवितुः ।
सवितुः प्रसवे । प्रसव इति । प्रसव इति प्र - सवे । इत्याह ।
आह प्रसूत्यै । प्रसूत्या अग्निः । प्रसूत्या इति प्र - सूत्यै ।

अग्निर् देवेभ्यः । देवेभ्यो निलायत । निलायत सः । स वेणुम् ।
वेणुम् प्र । प्राविशत् । अविशथ् सः । स एताम् । एतामूतिम् ।
ऊतिमनु । अनु सम् । समचरत् । अचरद् यत् । यद् वेणोः ।
वेणोः सुषिरम् । सुषिर॒ सुषिरा । सुषिराऽभ्रिः । अभ्रिर् भवति ।
भवति सयोनित्वाय । सयोनित्वाय सः । सयोनित्वायेति
सयोनि – त्वाय । स यत्रयत्र । यत्रयत्रावसत् । यत्रयत्रेति यत्र–यत्र ।
अवसत् तत् । तत् कृष्णम् । कृष्णमभवत् । अभवत् कल्माषी ।
कल्माषी भवति । भवति रूपसमृद्ध्यै । रूपसमृद्ध्या उभयतःक्ष्णूः ।
रूपसमृद्ध्या इति रूप – समृद्ध्यै । उभयतःक्ष्णूर् भवति ।
उभयतःक्ष्णूरित्युभयतः – क्ष्णूः । भवतीतः । इतश्च ( ) । चामुतः ।
अमुतश्च । चार्कस्य । अर्कस्यावरुद्ध्यै । अवरुद्ध्यै व्याममात्री ।
अवरुद्ध्या इत्यव – रुद्ध्यै । व्याममात्री भवति । व्याममात्रीति
व्याम – मात्री । भवत्येतावत् । एतावद् वै । वै पुरुषे ।
पुरुषे वीर्यम् । वीर्यम् ँवीर्यसम्मिता । वीर्यसम्मिताऽपरिमिता ।
वीर्यसम्मितेति वीर्य – सम्मिता । अपरिमिता भवति ।

अपरिमितेत्यपरि–मिता । भवत्यपरिमितस्य । अपरिमितस्यावरुद्ध्यै ।
अपरिमितस्येत्यपरि – मितस्य । अवरुद्ध्यै यः । अवरुद्ध्या
इत्यव – रुद्ध्यै । यो वनस्पतीनाम् । वनस्पतीनाम् फलग्रहिः ।
फलग्रहिः सः । फलग्रहिरिति फल – ग्रहिः । स एषाम् । एषाम्
ँवीर्यावान् । वीर्यावान् फलग्रहिः । वीर्यावानिति वीर्य – वान् ।
फलग्रहिर् वेणुः । फलग्रहिरिति फल – ग्रहिः । वेणुर् वैणवी ।
वैणवी भवति । भवति वीर्यस्य । वीर्यस्यावरुद्ध्यै ।
अवरुद्ध्या इत्यव – रुद्ध्यै । **4** (**77/95**)

*(कामयेत – गायत्री– ऽर्द्धयेति – च – सप्तविꣳशतिश्च) (A1)*

**T.S. 5.1.2.1 - Kramam**

व्यृद्धम् ँवै । व्यृद्धमिति वि – ऋद्धम् । वा एतत् । एतद् यज्ञस्य ।
यज्ञस्य यत् । यदयजुष्केण । अयजुष्केण क्रियते ।
अयजुष्केणेत्ययजुः – केन । क्रियत इमाम् । इमामगृभ्णन्न् ।
अगृभ्णन् रशनाम् । रशनामृतस्य । ऋतस्येति । इत्यश्वाभिधानीम् ।
अश्वाभिधानीमा । अश्वाभिधानीमित्यश्व – अभिधानीम् । आ दत्ते ।
दत्ते यजुष्कृत्यै । यजुष्कृत्यै यज्ञस्य । यजुष्कृत्या इति यजुः–कृत्यै ।

यज्ञस्य समृद्ध्यै । समृद्ध्यै प्रतूर्तम् । समृद्ध्या इति सम् - ऋद्ध्यै । प्रतूर्तम् वाजिन्न् । प्रतूर्तमिति प्र - तूर्तम् । वाजिन्ना । आ द्रव । द्रवेति । इत्यश्वम् । अश्वमभि । अभि दधाति । दधाति रूपम् । रूपमेव । एवास्य । अस्यैतत् । एतन् महिमानम् । महिमानम् व्याचष्टे । व्याचष्टे युञ्जाथाम् । व्याचष्ट इति वि - आचष्टे । युञ्जाथा रासभम् । रासभम् युवम् । युवमिति । इति गर्दभम् । गर्दभमसति । असत्येव । एव गर्दभम् । गर्दभम् प्रति । प्रतिष्ठापयति । स्थापयति तस्मात् । तस्मादश्वात् । अश्वाद् गर्दभः । गर्दभोऽसत्तरः । असत्तरो योगेयोगे । असत्तर इत्यसत् - तरः । योगेयोगे तवस्तरम् । योगेयोग इति योगे-योगे । तवस्तरमिति । तवस्तरमिति तवः - तरम् । इत्याह । आह योगेयोगे । 5 (50/60)

**T.S. 5.1.2.2 - Kramam**

योगेयोग एव । योगेयोग इति योगे-योगे । एवैनम् । एनम् युङ्क्ते । युङ्क्ते वाजेवाजे । वाजेवाजे हवामहे । वाजेवाज इति वाजे-वाजे । हवामह इति । इत्याह । आहान्नम् । अन्नम् वै । वै वाजः ।

वाजोऽन्नम् । अन्नमेव । एवाव । अव रुन्धे । रुन्धे सखायः ।
सखाय इन्द्रम् । इन्द्रमूतये । ऊतय इति । इत्याह । आहेन्द्रियम् ।
इन्द्रियमेव । एवाव । अव रुन्धे । रुन्धेऽग्निः । अग्निर् देवेभ्यः ।
देवेभ्यो निलायत । निलायत तम् । तम् प्रजापतिः । प्रजापतिरनु ।
प्रजापतिरिति प्रजा - पतिः । अन्वविन्दत् । अविन्दत् प्राजापत्यः ।
प्राजापत्योऽश्वः । प्राजापत्य इति प्राजा - पत्यः । अश्वोऽश्वेन ।
अश्वेन सम् । सम् भरति । भरत्यनुवित्यै । अनुवित्यै पापवस्यसम् ।
अनुवित्या इत्यनु - वित्यै । पापवस्यसम् वै । पापवस्यसमिति
पाप - वस्यसम् । वा एतत् । एतत् क्रियते । क्रियते यत् ।
यच्छ्रेयसा । श्रेयसा च । च पापीयसा । पापीयसा च ।
च समानम् । समानम् कर्म । कर्म कुर्वन्ति । कुर्वन्ति पापीयान् ।
पापीयान्. हि । **6** (**50/56**)

**T.S. 5.1.2.3 - Kramam**

ह्यश्वात् । अश्वाद् गर्दभः । गर्दभोऽश्वम् । अश्वम् पूर्वम् ।
पूर्वम् नयन्ति । नयन्ति पापवस्यसस्य । पापवस्यसस्य व्यावृत्त्यै ।

पापवस्यसस्येति पाप - वस्यसस्य । व्यावृत्त्यै तस्मात् । व्यावृत्त्या इति वि - आवृत्त्यै । तस्माच्छ्रेयाꣳसम् । श्रेयाꣳसम् पापीयान् । पापीयान् पश्चात् । पश्चादनु । अन्वेति । एति बहुः । बहुर् वै । वै भवतः । भवतो भ्रातृव्यः । भ्रातृव्यो भवति । भवतीव । इव खलु । खलु वै । वा एषः । एष यः । योऽग्निम् । अग्निम् चिनुते । चिनुते वज्री । वज्र्यश्वः । अश्वः प्रतूर्वन्न् । प्रतूर्वन्ना । प्रतूर्वन्निति प्र - तूर्वन्न् । एहि । इह्यवक्रामन्न् । अवक्रामन्नशस्तीः । अवक्रामन्नित्यव - क्रामन्न् । अशस्तीरिति । इत्याह । आह वज्रेण । वज्रेणैव । एव पाप्मानम् । पाप्मानम् भ्रातृव्यम् । भ्रातृव्यमव । अव क्रामति । क्रामति रुद्रस्य । रुद्रस्य गाणपत्यात् । गाणपत्यादिति । गाणपत्यादिति गाण - पत्यात् । इत्याह । आह रौद्राः । रौद्रा वै । वै पशवः । पशवो रुद्रात् । रुद्रादेव । **7 (50/54)**

**T.S. 5.1.2.4 - Kramam**

एव पशून् । पशुन् निर्याच्य । निर्याच्यात्मने । निर्याच्येति निः - याच्य । आत्मने कर्म । कर्म कुरुते । कुरुते पूष्णा । पूष्णा सयुजा । सयुजा सह । सयुजेति स - युजा । सहेति ।

इत्याह । आह पूषा । पूषा वै । वा अद्ध्वनाम् । अद्ध्वना॑ᳪ सन्नेता । सन्नेता समष्ट्यै । सन्नेतेति सम् - नेता । समष्ट्यै पुरीषायतनः । समष्ट्या इति सम् - अष्ट्यै । पुरीषायतनो वै । पुरीषायतन इति पुरीष - आयतनः । वा एषः । एष यत् । यदग्निः । अग्निरङ्गिरसः । अङ्गिरसो वै । वा एतम् । एतमग्रे । अग्रे देवतानाम् । देवताना॑ᳪ सम् । समभरन्न् । अभरन् पृथिव्याः । पृथिव्याः सधस्थात् । सधस्थादग्निम् । सधस्थादिति सध - स्थात् । अग्निम् पुरीष्यम् । पुरीष्यमङ्गिरस्वत् । अङ्गिरस्वदच्छ । अच्छेहि । एहीति । इत्याह । आह सायतनम् । सायतनमेव । सायतनमिति स - आयतनम् । एवैनम् । एनम् देवताभिः । देवताभिः सम् । सम् भरति । भरत्यग्निम् । अग्निम् पुरीष्यम् । पुरीष्यमङ्गिरस्वत् । अङ्गिरस्वदच्छ । अच्छेमः । इम इति । इत्याह । आह येन । येन सङ्गच्छते । **8 (50/58)**

**T.S. 5.1.2.5 - Kramam**

सङ्गच्छते वाजम् । सङ्गच्छत इति सम् - गच्छते । वाजमेव । एवास्य । अस्य वृङ्क्ते । वृङ्क्ते प्रजापतये । प्रजापतये प्रतिप्रोच्य । प्रजापतय इति प्रजा - पतये । प्रतिप्रोच्याग्निः ।

प्रतिप्रोच्येति प्रति – प्रोच्य । अग्निः सम्भृत्यः । सम्भृत्य इति ।
सम्भृत्य इति सम् – भृत्यः । इत्याहुः । आहुरियम् । इयम् ँवै ।
वै प्रजापतिः । प्रजापतिस्तस्याः । प्रजापतिरिति प्रजा – पतिः ।
तस्या एतत् । एतच्छ्रोत्रम् । श्रोत्रम् ँयत् । यद् वल्मीकः ।
वल्मीकोऽग्निम् । अग्निम् पुरीष्यम् । पुरीष्यमङ्गिरस्वत् ।
अङ्गिरस्वद् भरिष्यामः । भरिष्याम इति । इति वल्मीकवपाम् ।
वल्मीकवपामुप । वल्मीकवपामिति वल्मीक – वपाम् । उप तिष्ठते ।
तिष्ठते साक्षात् । साक्षादेव । साक्षादिति स – अक्षात् ।
एव प्रजापतये । प्रजापतये प्रतिप्रोच्य । प्रजापतय इति प्रजा–पतये ।
प्रतिप्रोच्याग्निम् । प्रतिप्रोच्येति प्रति – प्रोच्य । अग्नि॒ सम् ।
सम् भरति । भरत्यग्निम् । अग्निम् पुरीष्यम् । पुरीष्यमङ्गिरस्वत् ।
अङ्गिरस्वद् भरामः । भराम इति । इत्याह । आह येन ।
येन सङ्गच्छते । सङ्गच्छते वाजम् । सङ्गच्छत इति
सम् – गच्छते । वाजमेव । एवास्य । अस्य वृङ्क्ते । वृङ्क्तेऽनु ।
अन्वग्निः । अग्निरुषसाम् । उषसामग्रम् । अग्रमख्यत् । **9 (50/60)**

**T.S. 5.1.2.6 - Kramam**

अख्यदिति । इत्याह । आहानुख्यात्यै । अनुख्यात्या आगत्य ।

अनुख्यात्या इत्यनु – ख्यात्यै । आगत्य वाजी । आगत्येत्या–गत्य ।

वाज्यद्ध्वनः । अद्ध्वन आक्रम्य । आक्रम्यवाजिन्न् ।

आक्रम्येत्या – क्रम्य । वाजिन् पृथिवीम् । पृथिवीमिति । इत्याह ।

आहेच्छति । इच्छत्येव । एवैनम् । एनम् पूर्वया । पूर्वया विन्दति ।

विन्दत्युत्तरया । उत्तरया द्वाभ्याम् । उत्तरयेत्युत् – तरया । द्वाभ्यामा ।

आ क्रमयति । क्रमयति प्रतिष्ठित्यै । प्रतिष्ठित्या अनुरूपाभ्याम् ।

प्रतिष्ठित्या इति प्रति – स्थित्यै । अनुरूपाभ्याम् तस्मात् ।

अनुरूपाभ्यामित्यनु – रूपाभ्याम् । तस्मादनुरूपाः । अनुरूपाः

पशवः । अनुरूपा इत्यनु – रूपाः । पशवः प्र । प्र जायन्ते ।

जायन्ते द्यौः । द्यौस्ते । ते पृष्ठम् । पृष्ठम् पृथिवी । पृथिवी सधस्थम् ।

सधस्थमिति । सधस्थमिति सध – स्थम् । इत्याह । आहैभ्यः ।

एभ्यो वै । वा एतम् । एतम् ँलोकेभ्यः । लोकेभ्यः प्रजापतिः ।

प्रजापतिः सम् । प्रजापतिरिति प्रजा – पतिः । समैरयत् ।

ऐरयद् रूपम् । रूपमेव । एवास्य । अस्यैतत् । एतन् महिमानम् ।

महिमानम् ँव्याचष्टे । व्याचष्टे वज्री । व्याचष्ट इति वि – आचष्टे ।
वज्री वै ( ) । वा एषः । एष यत् । यदश्वः । अश्वो दद्भिः ।
दद्भिरन्यतोदद्भ्यः । दद्भिरिति दत् – भिः । अन्यतोदद्भ्यो भूयान् ।
अन्यतोदद्भ्य इत्यन्यतोदत् – भ्यः । भूयान् लोमभिः ।
लोमभिरुभयादद्भ्यः । लोमभिरिति लोम–भिः । उभयादद्भ्यो यम् ।
उभयादद्भ्य इत्युभयादत् – भ्यः । यम् द्विष्यात् । द्विष्यात् तम् ।
तमधस्पदम् । अधस्पदम् ध्यायेत् । अधस्पदमित्यधः – पदम् ।
ध्यायेद् वज्रेण । वज्रेणैव । एवैनम् । एन७ स्तृणुते ।
स्तृणुत इति स्तृणुते ॥ **10 (67/82) )**

***(आह – पापीयान् – रुद्रादेव – येना – अग्रम् – वज्री वै – सप्त दश च) (A2)***

**T.S. 5.1.3.1 - Kramam**

उत् क्राम । क्रामोत् । उदक्रमीत् । अक्रमीदिति । इति द्वाभ्याम् ।
द्वाभ्यामुत् । उत् क्रमयति । क्रमयति प्रतिष्ठित्यै । प्रतिष्ठित्या
अनुरूपाभ्याम् । प्रतिष्ठित्या इति प्रति – स्थित्यै । अनुरूपाभ्याम्
तस्मात् । अनुरूपाभ्यामित्यनु – रूपाभ्याम् । तस्मादनुरूपाः ।

अनुरूपाः पशवः । अनुरूपा इत्यनु - रूपाः । पशवः प्र ।

प्र जायन्ते । जायन्तेऽपः । अप उप । उप सृजति । सृजति यत्र ।

यत्र वै । वा आपः । आप उपगच्छन्ति ॥ उपगच्छन्ति तत् ।

उपगच्छन्तीत्युप - गच्छन्ति । तदोषधयः । ओषधयः प्रति ।

प्रति तिष्ठन्ति । तिष्ठन्त्योषधीः । ओषधीः प्रतितिष्ठन्तीः । प्रतितिष्ठन्तीः

पशवः । प्रतितिष्ठन्तीरिति प्रति - तिष्ठन्तीः । पशवोऽनु । अनु प्रति ।

प्रति तिष्ठन्ति । तिष्ठन्ति पशून् । पशून्. यज्ञः । यज्ञो यज्ञम् । यज्ञम्

ँयजमानः । यजमानो यजमानम् । यजमानम् प्रजाः । प्रजास्तस्मात् ।

प्रजा इति प्र - जाः । तस्मादपः । अप उप । उप सृजति ।

सृजति प्रतिष्ठित्यै । प्रतिष्ठित्यै यत् । प्रतिष्ठित्या इति प्रति - स्थित्यै ।

यदद्ध्वर्युः । अद्ध्वर्युरनग्नौ । अनग्नावाहुतिम् । आहुतिम्

जुहुयात् । आहुतिमित्या - हुतिम् । जुहुयादन्धः । अन्धोऽद्ध्वर्युः ।

अद्ध्वर्युः स्यात् । **11 (50/58)**

**T.S. 5.1.3.2 - Kramam**

स्याद् रक्षाꣳसि । रक्षाꣳसि यज्ञम् । यज्ञꣳ हन्युः । हन्युर् हिरण्यम् ।

हिरण्यमुपास्य । उपास्य जुहोति । उपास्येत्युप - अस्य ।

जुहोत्यग्निवति । अग्निवत्येव । अग्निवतीत्यग्नि – वति । एव

जुहोति । जुहोति न । नान्धः । अन्धोऽद्ध्वर्युः । अद्ध्वर्युर् भवति ।

भवति न । न यज्ञम् । यज्ञꣳ रक्षाꣳसि । रक्षाꣳसि घ्नन्ति ।

घ्नन्ति जिघर्मि । जिघर्म्यग्निम् । अग्निम् मनसा । मनसा घृतेन ।

घृतेनेति । इत्याह । आह मनसा । मनसा हि । हि पुरुषः ।

पुरुषो यज्ञम् । यज्ञमभिगच्छति । अभिगच्छति प्रतिक्ष्यन्तम् ।

अभिगच्छतीत्यभि – गच्छति । प्रतिक्ष्यन्तम् भुवनानि ।

प्रतिक्ष्यन्तमिति प्रति–क्ष्यन्तम् । भुवनानि विश्वा । विश्वेति । इत्याह ।

आह सर्वम् । सर्वꣳ हि । ह्येषः । एष प्रत्यङ्ङ् । प्रत्यङ् क्षेति ।

क्षेति पृथुम् । पृथुम् तिरश्चा । तिरश्चा वयसा । वयसा बृहन्तम् ।

बृहन्तमिति । इत्याह । आहाल्पः । अल्पो हि । ह्येषः । एष जातः ।

जातो महान् । महान् भवति । **12 (50/54)**

**T.S. 5.1.3.3 - Kramam**

भवति व्यचिष्ठम् । व्यचिष्ठमन्नम् । अन्नꣳ रभसम् । रभसम्

ँविदानम् । विदानमिति । इत्याह । आहान्नम् । अन्नमेव । एवास्मै ।

अस्मै स्वदयति । स्वदयति सर्वम् । सर्वमस्मै । अस्मै स्वदते ।
स्वदते यः । य एवम् । एवम् वेद । वेदा । आ त्वा । त्वा जिघर्मि ।
जिघर्मि वचसा । वचसा घृतेन । घृतेनेति । इत्याह । आह तस्मात् ।
तस्माद् यत् । यत् पुरुषः । पुरुषो मनसा । मनसाऽभिगच्छति ।
अभिगच्छति तत् । अभिगच्छतीत्यभि – गच्छति । तद् वाचा ।
वाचा वदति । वदत्यरक्षसा । अरक्षसेति । इत्याह । आह रक्षसाम् ।
रक्षसामपहत्यै । अपहत्यै मर्यश्रीः । अपहत्या इत्यप – हत्यै ।
मर्यश्रीः स्पृहयद्वर्णः । मर्यश्रीरिति मर्य–श्रीः । स्पृहयद्वर्णो अग्निः ।
स्पृहयद्वर्ण इति स्पृहयत् – वर्णः । अग्निरिति । इत्याह ।
आहापचितिम् । अपचितिमेव । अपचितिमित्यप – चितिम् ।
एवास्मिन्न् । अस्मिन् दधाति । दधात्यपचितिमान् ।
अपचितिमान् भवति । अपचितिमानित्यपचिति – मान् ।
भवति यः । य एवम् । एवम् वेद । **13** (**50/56**)

**T.S. 5.1.3.4 - Kramam**

वेद मनसा । मनसा तु । त्वै । वै ताम् । तामाप्तुम् । आप्तुमर्.हति ।
अर्.हति याम् । यामद्ध्वर्युः । अद्ध्वर्युरनग्नौ । अनग्नावाहुतिम् ।

आहुतिम् जुहोति । आहुतिमित्या–हुतिम् । जुहोति मनस्वतीभ्याम् ।
मनस्वतीभ्याम् जुहोति । जुहोत्याहुत्योः । आहुत्योराप्त्यै ।
आहुत्योरित्या – हुत्योः । आप्त्यै द्वाभ्याम् । द्वाभ्याम् प्रतिष्ठित्यै ।
प्रतिष्ठित्यै यज्ञमुखेयज्ञमुखे । प्रतिष्ठित्या इति प्रति – स्थित्यै ।
यज्ञमुखे यज्ञमुखे वै । यज्ञमुखे यज्ञमुख इति यज्ञमुखे–यज्ञमुखे ।
वै क्रियमाणे । क्रियमाणे यज्ञम् । यज्ञ॑ रक्षा॑सि । रक्षा॑सि
जिघा॑सन्ति । जिघा॑सन्त्येतर्.हि । एतर्.हि खलु । खलु वै ।
वा एतत् । एतद् यज्ञमुखम् । यज्ञमुखम् ँयर्.हि । यज्ञमुखमिति
यज्ञ – मुखम् । यर्.ह्येनत् । एनदाहुतिः । आहुतिरश्नुते ।
आहुतिरित्या – हुतिः । अश्नुते परि । परि लिखति । लिखति
रक्षसाम् । रक्षसामपहत्यै । अपहत्यै तिसृभिः । अपहत्या
इत्यप – हत्यै । तिसृभिः परि । तिसृभिरिति तिसृ – भिः ।
परि लिखति । लिखति त्रिवृत् । त्रिवृद् वै । त्रिवृदिति त्रि–वृत् ।
वा अग्निः । अग्निर् यावान् । यावानेव । एवाग्निः । अग्निस्तस्मात् ।

तस्माद् रक्षाꣳसि । रक्षाꣳस्यप । अप हन्ति ।

हन्ति गायत्रिया । **14 (50/59)**

**T.S. 5.1.3.5 - Kramam**

गायत्रिया परि । परि लिखति । लिखति तेजः । तेजो वै । वै गायत्री ।

गायत्री तेजसा । तेजसैव । एवैनम् । एनम् परि । परि गृह्णाति ।

गृह्णाति त्रिष्टुभा । त्रिष्टुभा परि । परि लिखति । लिखतीन्द्रियम् ।

इन्द्रियम् ँवै । वै त्रिष्टुक् । त्रिष्टुगिन्द्रियेण । इन्द्रियेणैव । एवैनम् ।

एनम् परि । परि गृह्णाति । गृह्णात्यनुष्टुभा । अनुष्टुभा परि ।

अनुष्टुभेत्यनु - स्तुभा । परि लिखति । लिखत्यनुष्टुप् । अनुष्टुफ्

सर्वाणि । अनुष्टुबित्यनु - स्तुप् । सर्वाणि छन्दाꣳसि । छन्दाꣳसि

परिभूः । परिभूः पर्याप्त्यै । परिभूरिति परि-भूः । पर्याप्त्यै मद्ध्यतः ।

पर्याप्त्या इति परि - आप्त्यै । मद्ध्यतोऽनुष्टुभा । अनुष्टुभा वाक् ।

अनुष्टुभेत्यनु - स्तुभा । वाग् वै । वा अनुष्टुप् । अनुष्टुप् तस्मात् ।

अनुष्टुबित्यनु - स्तुप् । तस्मान् मद्ध्यतः । मद्ध्यतो वाचा ।

वाचा वदामः । वदामो गायत्रिया । गायत्रिया प्रथमया । प्रथमया परि ।

परि लिखति । लिखत्यथ । अथानुष्टुभा । अनुष्टुभाऽथ ।

अनुष्टुभेत्यनु - स्तुभा । अथ त्रिष्टुभा । त्रिष्टुभा तेजः । तेजो वै ।
वै गायत्री ( ) । गायत्री यज्ञः । यज्ञोऽनुष्टुक् । अनुष्टुगिन्द्रियम् ।
अनुष्टुगित्यनु-स्तुक् । इन्द्रियम् त्रिष्टुप् । त्रिष्टुप् तेजसा । तेजसा च ।
चैव । एवेन्द्रियेण । इन्द्रियेण च । चोभयतः । उभयतो यज्ञम् ।
यज्ञम् परि । परि गृह्णाति । गृह्णातीति गृह्णाति ॥ **15** (**63/71**)

***(अन्धो ऽद्ध्वर्यु - र्महान् - भवति य एवꣳ - हन्ति - त्रिष्टुभा तेजो वै गायत्री - त्रयोदश च) (A3)***

**T.S. 5.1.4.1 - Kramam**

देवस्य त्वा । त्वा सवितुः । सवितुः प्रसवे । प्रसव इति । प्रसव
इति प्र - सवे । इति खनति । खनति प्रसूत्यै । प्रसूत्या अथो ।
प्रसूत्या इति प्र - सूत्यै । अथो धूमम् । अथो इत्यथो । धूममेव ।
एवैतेन । एतेन जनयति । जनयति ज्योतिष्मन्तम् । ज्योतिष्मन्तम्
त्वा । त्वाऽग्ने । अग्ने सुप्रतीकम् । सुप्रतीकमिति । सुप्रतीकमिति
सु - प्रतीकम् । इत्याह । आह ज्योतिः । ज्योतिरेव । एवैतेन ।
एतेन जनयति । जनयति सः । सोऽग्निः । अग्निर् जातः ।
जातः प्रजाः । प्रजाः शुचा । प्रजा इति प्र - जाः । शुचाऽऽर्पयत् ।

अर्पयत् तम् । तम् देवाः । देवा अर्द्धर्चेन । अर्द्धर्चेनाशमयन्न् ।
अर्द्धर्चेनेत्यर्द्ध – ऋचेन । अशमयञ्छिवम् । शिवम् प्रजाभ्यः ।
प्रजाभ्योऽहि॒ꣳसन्तम् । प्रजाभ्य इति प्र – जाभ्यः ।
अहि॒ꣳसन्तमिति । इत्याह । आह प्रजाभ्यः । प्रजाभ्य एव । प्रजाभ्य
इति प्र – जाभ्यः । एवैनम् । एनꣳ शमयति । शमयति द्वाभ्याम् ।
द्वाभ्याम् खनति । खनति प्रतिष्ठित्यै । प्रतिष्ठित्या अपाम् । प्रतिष्ठित्या
इति प्रति – स्थित्यै । अपाम् पृष्ठम् । पृष्ठमसि । असीति ।
इति पुष्करपर्णम् । पुष्करपर्णमा । पुष्करपर्णमिति पुष्कर – पर्णम् ।
आ हरति । **16 (50/60)**

**T.S. 5.1.4.2 - Kramam**

हरत्यपाम् । अपाम् वै । वा एतत् । एतत् पृष्ठम् । पृष्ठम् यत् । यत्
पुष्करपर्णम् । पुष्करपर्णꣳ रूपेण । पुष्करपर्णमिति पुष्कर – पर्णम् ।
रूपेणैव । एवैनत् । एनदा । आ हरति । हरति पुष्करपर्णेन ।
पुष्करपर्णेन सम् । पुष्करपर्णेनेति पुष्कर – पर्णेन । सम् भरति ।
भरति योनिः । योनिर् वै । वा अग्नेः । अग्नेः पुष्करपर्णम् ।
पुष्करपर्णꣳ सयोनिम् । पुष्करपर्णमिति पुष्कर–पर्णम् । सयोनिमेव ।

सयोनिमिति स – योनिम् । एवाग्निम् । अग्नि॒ सम् । सम् भरति ।
भरति कृष्णाजिनेन । कृष्णाजिनेन सम् । कृष्णाजिनेनेति
कृष्ण – अजिनेन । सम् भरति । भरति यज्ञः । यज्ञो वै ।
वै कृष्णाजिनम् । कृष्णाजिनम् ँयज्ञेन । कृष्णाजिनमिति
कृष्ण–अजिनम् । यज्ञेनैव । एव यज्ञम् । यज्ञ॒ सम् । सम् भरति ।
भरति यत् । यद् ग्राम्याणाम् । ग्राम्याणाम् पशूनाम् । पशूनाम् चर्मणा ।
चर्मणा सम्भरेत् । सम्भरेद् ग्राम्यान् । सम्भरेदिति सम् – भरेत् ।
ग्राम्यान् पशून् । पशूञ्छुचा । शुचाऽर्पयेत् । अर्पयेत् कृष्णाजिनेन ।
कृष्णाजिनेन सम् । कृष्णाजिनेनेति कृष्ण – अजिनेन । सम् भरति ।
भरत्यारण्यान् । आरण्यानेव । एव पशून् । पशूञ्छुचा । **17 (50/58)**

**T.S. 5.1.4.3 - Kramam**

शुचाऽर्पयति । अर्पयति तस्मात् । तस्माथ् समावत् । समावत्
पशूनाम् । पशूनाम् प्रजायमानानाम् । प्रजायमानानामारण्याः ।
प्रजायमानानामिति प्र – जायमानानाम् । आरण्याः पशवः ।
पशवः कनीया॒सः । कनीया॒सः शुचा । शुचा हि । ह्यृताः ।
ऋता लोमतः । लोमतः सम् । सम् भरति । भरत्यतः । अतो हि ।

ह्यस्य । अस्य मेद्ध्यम् । मेद्ध्यम् कृष्णाजिनम् । कृष्णाजिनम् च ।
कृष्णाजिनमिति कृष्ण – अजिनम् । च पुष्करपर्णम् । पुष्करपर्णम्
च । पुष्करपर्णमिति पुष्कर – पर्णम् । च सम् । स७ स्तृणाति ।
स्तृणातीयम् । इयम् वै । वै कृष्णाजिनम् । कृष्णाजिनमसौ ।
कृष्णाजिनमिति कृष्ण – अजिनम् । असौ पुष्करपर्णम् ।
पुष्करपर्णमाभ्याम् । पुष्करपर्णमिति पुष्कर–पर्णम् । आभ्यामेव ।
एवैनम् । एनमुभयतः । उभयतः परि । परि गृह्णाति । गृह्णात्यग्निः ।
अग्निर् देवेभ्यः । देवेभ्यो निलायत । निलायत तम् । तमथर्वा ।
अथर्वाऽनु । अन्वपश्यत् । अपश्यदथर्वा । अथर्वा त्वा ।
त्वा प्रथमः । प्रथमो निः । निरमन्थत् । अमन्थदग्ने । अग्न इति ।
इत्याह । **18 (50/55)**

**T.S. 5.1.4.4 - Kramam**

आह यः । य एव । एवैनम् । एनमन्वपश्यत् । अन्वपश्यत् तेन ।
अन्वपश्यदित्यनु – अपश्यत् । तेनैव । एवैनम् । एन७ सम् ।
सम् भरति । भरति त्वाम् । त्वामग्ने । अग्ने पुष्करात् । पुष्करादधि ।

अधीति । इत्याह । आह पुष्करपर्णे । पुष्करपर्णे हि । पुष्करपर्ण इति

पुष्कर – पर्णे । ह्येनम् । एनमुपश्रितम् । उपश्रितमविन्दत् ।

उपश्रितमित्युप – श्रितम् । अविन्दत् तम् । तमु । उ त्वा ।

त्वा दद्ध्यङ्ङ् । दद्ध्यङ्ङृषिः । ऋषिरिति । इत्याह । आह दद्ध्यङ्ङ् ।

दद्ध्यङ् वै । वा आथर्वणः । आथर्वणस्तेजस्वी । तेजस्व्यासीत् ।

आसीत् तेजः । तेज एव । एवास्मिन्न् । अस्मिन् दधाति ।

दधाति तम् । तमु । उ त्वा । त्वा पाथ्यः । पाथ्यो वृषा । वृषेति ।

इत्याह । आह पूर्वम् । पूर्वमेव । एवोदितम् । उदितमुत्तरेण ।

उत्तरेणाभि । उत्तरेणेत्युत् – तरेण । अभि गृणाति ।

गृणाति चतसृभिः । **19 (50/54)**

**T.S. 5.1.4.5 - Kramam**

चतसृभिः सम् । चतसृभिरिति चतसृ – भिः । सम् भरति । भरति

चत्वारि । चत्वारि छन्दाꣳसि । छन्दाꣳसि छन्दोभिः । छन्दोभिरेव ।

छन्दोभिरिति छन्दः–भिः । एव गायत्रीभिः । गायत्रीभिर् ब्राह्मणस्य ।

ब्राह्मणस्य गायत्रः । गायत्रो हि । हि ब्राह्मणः । ब्राह्मणास्त्रिष्टुग्भिः ।

त्रिष्टुग्भी राजन्यस्य । त्रिष्टुग्भिरिति त्रिष्टुक्–भिः । राजन्यस्य त्रैष्टुभः ।

त्रैष्टुभो हि । हि राजन्यः । राजन्यो यम् । यम् कामयेत ।
कामयेत वसीयान् । वसीयान्थ् स्यात् । स्यादिति । इत्युभयीभिः ।
उभयीभिस्तस्य । तस्य सम् । सम् भरेत् । भरेत् तेजः । तेजश्च ।
चैव । एवास्मै । अस्मा इन्द्रियम् । इन्द्रियम् च । च समीची ।
समीची दधाति । समीची इति समीची । दधात्यष्टाभिः ।
अष्टाभिः सम् । सम् भरति । भरत्यष्टाक्षरा । अष्टाक्षरा गायत्री ।
अष्टाक्षरेत्यष्टा – अक्षरा । गायत्री गायत्रः । गायत्रोऽग्निः । अग्निर्
यावान् । यावानेव । एवाग्निः । अग्निस्तम् । तꣳ सम् । सम् भरति ।
भरति सीद । सीद होतः । होतरिति ( ) । इत्याह । आह देवताः ।
देवता एव । एवास्मै । अस्मै सम् । सꣳ सादयति । सादयति नि ।
नि होता । होतेति । इति मनुष्यान् । मनुष्यान्थ् सम् । सꣳ सीदस्व ।
सीदस्वेति । इति वयाꣳसि । वयाꣳसि जनिष्व । जनिष्वा हि ।
हि जेन्यः । जेन्यो अग्रे । अग्रे अह्नाम् । अह्नामिति । इत्याह ।
आह देवमनुष्यान् । देवमनुष्यानेव । देवमनुष्यानिति देव–मनुष्यान् ।

एवास्मै । अस्मै सꣳसन्नान् । सꣳसन्नान् प्र । सꣳसन्नानिति

सम् – सन्नान् । प्र जनयति । जनयतीति जनयति ॥ 20 (77/84)

*(ऐ–व पशू–निति–गृणाति–होतरिति–सप्तविꣳशतिश्च) (A4)*

**T.S. 5.1.5.1 - Kramam**

क्रूरमिव । इव वै । वा अस्याः । अस्या एतत् । एतत् करोति ।

करोति यत् । यत् खनति । खनत्यपः । अप उप । उप सृजति ।

सृजत्यापः । आपो वै । वै शान्ताः । शान्ताः शान्ताभिः ।

शान्ताभिरेव । एवास्यै । अस्यै शुचम् । शुचꣳ शमयति । शमयति

सम् । सम् ते । ते वायुः । वायुर् मातरिश्वा । मातरिश्वा दधातु ।

दधात्विति । इत्याह । आह प्राणः । प्राणो वै । प्राण इति प्र–अनः ।

वै वायुः । वायुः प्राणेन । प्राणेनैव । प्राणेनेति प्र–अनेन । एवास्यै ।

अस्यै प्राणम् । प्राणꣳ सम् । प्राणमिति प्र – अनम् । सम् दधाति ।

दधाति सम् । सम् ते । ते वायुः । वायुरिति । इत्याह । आह

तस्मात् । तस्माद् वायुप्रच्युता । वायुप्रच्युता दिवः । वायुप्रच्युतेति

वायु – प्रच्युता । दिवो वृष्टिः । वृष्टिरीर्ते । ईर्ते तस्मै । तस्मै च ।

च देवि । देवि वषट् । वषडस्तु । अस्तु तुभ्यम् । 21 (50/54)

**T.S. 5.1.5.2 - Kramam**

तुभ्यमिति । इत्याह । आह षट् । षड् वै । वा ऋतवः ।
ऋतव ऋतुषु । ऋतुष्वेव । एव वृष्टिम् । वृष्टिम् दधाति ।
दधाति तस्मात् । तस्माथ् सर्वान् । सर्वानृतून् । ऋतून् वर्.षति ।
वर्.षति यत् । यद् वषट्कुर्यात् । वषट्कुर्याद् यातयामा ।
वषट्कुर्यादिति वषट् - कुर्यात् । यातयामाऽस्य । यातयामेति
यात - यामा । अस्य वषट्कारः । वषट्कारः स्यात् । वषट्कार इति
वषट्-कारः । स्याद् यत् । यन् न । न वषट्कुर्यात् । वषट्कुर्याद्
रक्षाꣳसि । वषट्कुर्यादिति वषट् - कुर्यात् । रक्षाꣳसि यज्ञम् ।
यज्ञꣳ हन्युः । हन्युर् वट् । वडिति । इत्याह । आह परोक्षम् ।
परोक्षमेव । परोक्षमिति परः - अक्षम् । एव वषट् । वषट् करोति ।
करोति न । नास्य । अस्य यातयामा । यातयामा वषट्कारः ।
यातयामेति यात - यामा । वषट्कारो भवति । वषट्कार इति
वषट् - कारः । भवति न । न यज्ञम् । यज्ञꣳ रक्षाꣳसि । रक्षाꣳसि
घ्नन्ति । घ्नन्ति सुजातः । सुजातो ज्योतिषा । सुजात इति
सु - जातः । ज्योतिषा सह । सहेति । इत्यनुष्टुभा । अनुष्टुभोप ।

अनुष्टुभेत्यनु–स्तुभा । उप नह्यति । नह्यत्यनुष्टुप् । अनुष्टुफ् सर्वाणि । अनुष्टुबित्यनु – स्तुप् । **22 (50/60)**

**T.S. 5.1.5.3 - Kramam**

सर्वाणि छन्दाꣳसि । छन्दाꣳसि छन्दाꣳसि । छन्दाꣳसि खलु । खलु वै । वा अग्नेः । अग्नेः प्रिया । प्रिया तनूः । तनूः प्रियया । प्रिययैव । एवैनम् । एनम् तनुवा । तनुवा परि । परि दधाति । दधाति वेदुकः । वेदुको वासः । वासो भवति । भवति यः । य एवम् । एवम् वेद । वेद वारुणः । वारुणो वै । वा अग्निः । अग्निरुपनद्धः । उपनद्ध उत् । उपनद्ध इत्युप – नद्धः । उदु । उ तिष्ठ । तिष्ठ स्वद्ध्वर । स्वद्ध्वरोद्र्ध्वः । स्वद्ध्वरेति सु–अद्ध्वर । ऊद्र्ध्व उ । ऊ षु णः । सु नः । न ऊतये । ऊतय इति । इति सावित्रीभ्याम् । सावित्रीभ्यामुत् । उत् तिष्ठति । तिष्ठति सवितृप्रसूतः । सवितृप्रसूत एव । सवितृप्रसूत इति सवितृ–प्रसूतः । एवास्य । अस्योद्र्ध्वाम् । ऊद्र्ध्वाम् वँरुणमेनिम् । वरुणमेनिमुत् । वरुणमेनिमिति वरुण – मेनिम् । उथ् सृजति । सृजति द्वाभ्याम् । द्वाभ्याम् प्रतिष्ठित्यै । प्रतिष्ठित्यै सः ।

प्रतिष्ठित्या इति प्रति – स्थित्यै । स जातः । जातो गर्भः ।

गर्भो असि । असि रोदस्योः । **23 (50/55)**

**T.S. 5.1.5.4 - Kramam**

रोदस्योरिति । इत्याह । आहेमे । इमे वै । इमे इतीमे । वै रोदसी ।

रोदसी तयोः । रोदसी इति रोदसी । तयोरेषः । एष गर्भः । गर्भो

यत् । यदग्निः । अग्निस्तस्मात् । तस्मादेवम् । एवमाह । आहाग्ने ।

अग्ने चारुः । चारुर् विभृतः । विभृत ओषधीषु । विभृत इति

वि–भृतः । ओषधीष्विति । इत्याह । आह यदा । यदा हि । ह्येतम् ।

एतम् ँविभरन्ति । विभरन्त्यथ । विभरन्तीतिवि – भरन्ति ।

अथ चारुतरः । चारुतरो भवति । चारुतर इति चारु – तरः ।

भवति प्र । प्र मातृभ्यः । मातृभ्यो अधि । मातृभ्य इति मातृ–भ्यः ।

अधि कनिक्रदत् । कनिक्रदद् गाः । गा इति । इत्याह । आहौषधयः ।

ओषधयो वै । वा अस्य । अस्य मातरः । मातरस्ताभ्यः । ताभ्य एव ।

एवैनम् । एनम् प्र । प्र च्यावयति । च्यावयति स्थिरः । स्थिरो भव ।

भव वीड्वङ्गः । वीड्वङ्ग इति । विड्वङ्ग इति विडु – अङ्गः ।

इति गर्दभे । गर्दभ आ । आ सादयति । सादयति सम् । **24 (50/57)**

**T.S. 5.1.5.5 - Kramam**

सम् नह्यति । नह्यत्यैव । एवैनम् । एनमेतया । एतया स्थेम्ने ।
स्थेम्ने गर्दभेन । गर्दभेन सम् । सम् भरति । भरति तस्मात् ।
तस्माद् गर्दभः । गर्दभः पशूनाम् । पशूनाम् भारभारितमः ।
भारभारितमो गर्दभेन । भारभारितम इति भारभारि – तमः । गर्दभेन
सम् । सम् भरति । भरति तस्मात् । तस्माद् गर्दभः । गर्दभोऽपि ।
अप्यनालेशे । अनालेशेऽति । अनालेश इत्यना–लेशे । अत्यन्यान् ।
अन्यान् पशून् । पशून् मेद्यति । मेद्यत्यन्नम् । अन्नꣳ हि । ह्येनेन ।
एनेनार्कम् । अर्कꣳ सम्भरन्ति । सम्भरन्ति गर्दभेन । सम्भरन्तीति
सम् – भरन्ति । गर्दभेन सम् । सम् भरति । भरति तस्मात् ।
तस्माद् गर्दभः । गर्दभो द्विरेताः । द्विरेताः सन्न् । द्विरेता इति
द्वि – रेताः । सन् कनिष्ठम् । कनिष्ठम् पशूनाम् । पशूनाम् प्र ।
प्र जायते । जायतेऽग्निः । अग्निर् हि । ह्यस्य । अस्य योनिम् ।
योनिम् निर्दहति । निर्दहति प्रजासु । निर्दहतीति निः – दहति ।
प्रजासु वै । प्रजास्विति प्र – जासु । वा एषः । एष एतर्.हि ।
एतर्.ह्यारूढः । आरूढः सः । आरूढ इत्या – रूढः । **25 (50/57)**

**T.S. 5.1.5.6 - Kramam**

स ईश्वरः । ईश्वरः प्रजाः । प्रजाः शुचा । प्रजा इति प्र – जाः ।

शुचा प्रदहः । प्रदहः शिवः । प्रदह इति प्र – दहः । शिवो भव ।

भव प्रजाभ्यः । प्रजाभ्य इति । प्रजाभ्य इति प्र–जाभ्यः । इत्याह ।

आह प्रजाभ्यः । प्रजाभ्य एव । प्रजाभ्य इति प्र–जाभ्यः । एवैनम् ।

एनꣳ शमयति । शमयति मानुषीभ्यः । मानुषीभ्यस्त्वम् ।

त्वमङ्गिरः । अङ्गिर इति । इत्याह । आह मानव्यः । मानव्यो हि ।

हि प्रजाः । प्रजा मा । प्रजा इति प्र – जाः । मा द्यावापृथिवी ।

द्यावापृथिवी अभि । द्यावापृथिवी इति द्यावा – पृथिवी ।

अभि शूशुचः । शूशुचो मा । माऽन्तरिक्षम् । अन्तरिक्षम् मा ।

मा वनस्पतीन् । वनस्पतीनिति । इत्याह । आहैभ्यः । एभ्य एव ।

एवैनम् । एनम् ँल्लोकेभ्यः । लोकेभ्यः शमयति । शमयति प्र । प्रैतु ।

एतु वाजी । वाजी कनिक्रदत् । कनिक्रददिति । इत्याह ।

आह वाजी । वाजी हि । ह्येषः । एष नानदत् ।

नानदद् रासभः । रासभः पत्वा । पत्वेति । इत्याह । **26 (50/56)**

**T.S. 5.1.5.7 - Kramam**

आह रासभः । रासभ इति । इति हि । ह्येतम् । एतमृषयः ।
ऋषयोऽवदन्न् । अवदन् भरन्न् । भरन्नग्निम् । अग्निम् पुरीष्यम् ।
पुरीष्यमिति । इत्याह । आहाग्निम् । अग्निꣳ हि । ह्येषः ।
एष भरति । भरति मा । मा पादि । पाद्यायुषः । आयुषः पुरा । पुरेति ।
इत्याह । आहायुः । आयुरेव । एवास्मिन्न् । अस्मिन् दधाति ।
दधाति तस्मात् । तस्माद् गर्दभः । गर्दभः सर्वम् । सर्वमायुः ।
आयुरेति । एति तस्मात् । तस्माद् गर्दभे । गर्दभे पुरा । पुराऽऽयुषः ।
आयुषः प्रमीते । प्रमीते बिभ्यति । प्रमीत इति प्र – मीते । बिभ्यति
वृषा । वृषाऽग्निम् । अग्निम् ँवृषणम् । वृषणम् भरन्न् । भरन्निति ।
इत्याह । आह वृषा । वृषा हि । ह्येषः । एष वृषा । वृषाऽग्निः ।
अग्निरपाम् । अपाम् गर्भम् । गर्भꣳ समुद्रियम् । **27 (50/51)**

**T.S. 5.1.5.8 - Kramam**

समुद्रियमिति । इत्याह । आहापाम् । अपाꣳ हि । ह्येषः । एष गर्भः ।
गर्भो यत् । यदग्निः । अग्निरग्ने । अग्न आ । आ याहि ।

याहि वीतये । वीतय इति । इति वै । वा इमौ । इमौ लोकौ । लोकौ वि । व्यैताम् । ऐतामग्ने । अग्न आ । आ याहि । याहि वीतये । वीतय इति । इति यत् । यदाह । आहानयोः । अनयोर् लोकयोः । लोकयोर् वीत्यै । वीत्यै प्रच्युतः । वीत्या इति वि - इत्यै । प्रच्युतो वै । प्रच्युत इति प्र - च्युतः । वा एषः । एष आयतनात् । आयतनादगतः । आयतनादित्या - यतनात् । अगतः प्रतिष्ठाम् । प्रतिष्ठा॑ँ सः । प्रतिष्ठामिति प्रति - स्थाम् । स एतर्.हि । एतर्ह्यद्ध्वर्युम् । अद्ध्वर्युम् च । च यजमानम् । यजमानम् च । च ध्यायति । ध्यायत्यृतम् । ऋत॑ँ सत्यम् । सत्यमिति । इत्याह । आहेयम् । इयम् ँवै । वा ऋतम् । ऋतमसौ । असौ सत्यम् । **28 (50/54)**

**T.S. 5.1.5.9 - Kramam**

सत्यमनयोः । अनयोरेव । एवैनम् । एनम् प्रति । प्रतिष्ठापयति । स्थापयति न । नार्तिम् । आर्तिमा । आर्च्छति । ऋच्छत्यद्ध्वर्युः । अद्ध्वर्युर् न । न यजमानः । यजमानो वरुणः । वरुणो वै । वा एषः । एष यजमानम् । यजमानमभि । अभ्या । ऐति । एति यत् । यदग्निः ।

अग्निरुपनद्धः । उपनद्ध ओषधयः । उपनद्ध इत्युप – नद्धः ।
ओषधयः प्रति । प्रति गृह्णीत । गृह्णीताग्निम् । अग्निमेतम् । एतमिति ।
इत्याह । आह शान्त्यै । शान्त्यै व्यस्यन्न् । व्यस्यन् विश्वाः ।
व्यस्यन्निति वि – अस्यन्न् । विश्वा अमतीः । अमतीरतीः ।
अरातीरिति । इत्याह । आह रक्षसाम् । रक्षसामपहत्यै ।
अपहत्यै निषीदन्न् । अपहत्या इत्यप – हत्यै । निषीदन् नः ।
निषीदन्निति नि – सीदन्न् । नो अप । अप दुर्मतिम् । दुर्मतिꣳ हनत् ।
दुर्मतिमिति दुः – मतिम् । हनदिति । इत्याह । आह प्रतिष्ठित्यै ।
प्रतिष्ठत्या ओषधयः । प्रतिष्ठित्या इति प्रति–स्थित्यै । ओषधयः प्रति ।
प्रति मोदद्ध्वम् ( ) । मोदद्ध्वमेनम् । **29 (50/56)**

**T.S. 5.1.5.10 - Kramam**

एनमिति । इत्याह । आहौषधयः । ओषधयो वै । वा अग्नेः ।
अग्नेर् भागधेयम् । भागधेयम् ताभिः । भागधेयमिति भाग–धेयम् ।
ताभिरेव । एवैनम् । एनꣳ सम् । समर्द्धयति । अर्द्धयति पुष्पावतीः ।
पुष्पावतीः सुपिप्पलाः । पुष्पावतीरिति पुष्प – वतीः । सुपिप्पला
इति । सुपिप्पला इति सु – पिप्पलाः । इत्याह । आह तस्मात् ।

तस्मादोषधयः । ओषधयः फलम् । फलम् गृह्णन्ति । गृह्णन्त्ययम् ।
अयम् वः । वो गर्भः । गर्भ ऋत्वियः । ऋत्वियः प्रत्नम् । प्रत्न
सधस्थम् । सधस्थमा । सधस्थमिति सध - स्थम् । आऽसदत् ।
असददिति । इत्याह । आह याभ्यः । याभ्य एव । एवैनम् । एनम्
प्रच्यावयति । प्रच्यावयति तासु । प्रच्यावयतीति प्र - च्यावयति ।
तास्वेव । एवैनम् । एनम् प्रति । प्रतिष्ठापयति । स्थापयति द्वाभ्याम् ।
द्वाभ्यामुपावहरति । उपावहरति प्रतिष्ठित्यै ।
उपावहरतीत्युप - अवहरति । प्रतिष्ठित्या इति प्रति - स्थित्यै ॥ 30

(42/48 ) ***(अस्त्व - नुष्टु - बसि - सादयत्या - रूढः - पत्वेति - गर्भ - मसौ - मोददध्वम् - द्विचत्वारिम्शच्च) (A5)***

**T.S. 5.1.6.1 - Kramam**

वारुणो वै । वा अग्निः । अग्निरुपनद्धः । उपनद्धो वि । उपनद्ध
इत्युप-नद्धः । वि पाजसा । पाजसेति । इति वि । वि स्रꣳसयति ।
स्रꣳसयति सवितृप्रसूतः । सवितृप्रसूत एव ।
सवितृप्रसूत इति सवितृ - प्रसूतः । एवास्य । अस्य विषूचीम् ।

विषूचीम् ँवरुणमेनिम् । वरुणमेनिम् ँवि । वरुणमेनिमिति
वरुण – मेनिम् । वि सृजति । सृजत्यपः । अप उप । उप सृजति ।
सृजत्यापः । आपो वै । वै शान्ताः । शान्ताः शान्ताभिः ।
शान्ताभिरेव । एवास्य । अस्य शुचम् । शुच७ँ शमयति । शमयति
तिसृभिः । तिसृभिरुप । तिसृभिरिति तिसृ – भिः । उप सृजति ।
सृजति त्रिवृत् । त्रिवृद् वै । त्रिवृदिति त्रि – वृत् । वा अग्निः ।
अग्निर् यावान् । यावानेव । एवाग्निः । अग्निस्तस्य । तस्य शुचम् ।
शुच७ँ शमयति । शमयति मित्रः । मित्रः स७ँसृज्य । स७ँसृज्य
पृथिवीम् । स७ँसृज्येति सम् – सृज्य । पृथिवीमिति । इत्याह ।
आह मित्रः । मित्रो वै । वै शिवः । शिवो देवानाम् । देवानाम् तेन ।
तेनैव । एवैनम् । **31 (50/56)**

**<u>T.S. 5.1.6.2 - Kramam</u>**

एन७ँ सम् । स७ँ सृजति । सृजति शान्त्यै । शान्त्यै यत् ।
यद् ग्राम्याणाम् । ग्राम्याणाम् पात्राणाम् । पात्राणाम् कपालैः ।
कपालैः स७ँसृजेत् । स७ँसृजेद् ग्राम्याणि । स७ँसृजेदिति
सम् – सृजेत् । ग्राम्याणि पात्राणि । पात्राणि शुचा । शुचाऽर्पयेत् ।

अर्पयेदर्मकपालैः । अर्मकपालैः सम् ।

अर्मकपालैरित्यर्म - कपालैः । स९्ँ सृजति । सृजत्येतानि ।

एतानि वै । वा अनुपजीवनीयानि । अनुपजीवनीयानि तानि ।

अनुपजीवनीयानीत्यनुप - जीवनीयानि । तान्येव । एव शुचा ।

शुचाऽर्पयति । अर्पयति शर्कराभिः । शर्कराभिः सम् । स९्ँ सृजति ।

सृजति धृत्यै । धृत्या अथो । अथो शन्त्वाय । अथो इत्यथो ।

शन्त्वायाजलोमैः । शन्त्वायेति शम् - त्वाय । अजलोमैः सम् ।

अजलोमैरित्यज - लोमैः । स९्ँ सृजति । सृजत्येषा । एषा वै ।

वा अग्नेः । अग्नेः प्रिया । प्रिया तनूः । तनूर् यत् । यदजा ।

अजा प्रियया । प्रिययैव । एवैनम् । एनम् तनुवा । तनुवा सम् ।

स९्ँ सृजति । सृजत्यथो । अथो तेजसा । अथो इत्यथो ।

तेजसा कृष्णाजिनस्य । कृष्णाजिनस्य लोमभिः ।

कृष्णाजिनस्येति कृष्ण - अजिनस्य । लोमभिः सम् ।

लोमभिरिति लोम - भिः । स९्ँ सृजति । **32** (**50/59**)

**T.S. 5.1.6.3 - Kramam**

सृजति यज्ञः । यज्ञो वै । वै कृष्णाजिनम् । कृष्णाजिनम् यज्ञेन ।
कृष्णाजिनमिति कृष्ण - अजिनम् । यज्ञेनैव । एव यज्ञम् ।
यज्ञꣳ सम् । सꣳ सृजति । सृजति रुद्राः । रुद्राः सम्भृत्य ।
सम्भृत्य पृथिवीम् । सम्भृत्येति सम्-भृत्य । पृथिवीमिति । इत्याह ।
